रथदारु। वल्लीहिरण्यम्। रथशब्द आद्युदात्तः। 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ. १६७) इत्यादिना क्थन्प्रत्ययः। वल्लीशब्दो ङीषः स्वरेणान्तोदात्तः। तदर्थे इति किम्? कुबेरबलिः। प्रकृतिविकारभावे स्वरोऽयमिष्यते॥

## अर्थे। (४४/३७७८)

चतुर्थी इति वर्तते। अर्थशब्दे उत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवति। [1]मात्रे इदं मात्रर्थम्। पित्रर्थम्। देवतार्थम्। अतिथ्यर्थम्। मातृपितृशब्दावन्तोदात्तावुणादिषु निपातितौ। देवताशब्दो लित्स्वरेण मध्योदात्तः। अतिथिः इति अतेरिथिन् इति इथिन्प्रत्ययान्तः। तदर्थविशेषा एव दारुहिरण्यादयो भवन्ति, न त्वर्थशब्दवाच्यं सामान्यं इत्यतदर्थार्थोऽयमारम्भः। केचित् पुनराहुः ज्ञापकार्थमिदम्। एतदनेन ज्ञाप्यते, पूर्वो विधिः प्रकृतिविकृत्योः समासे भवति। अश्वघासः, श्वश्रूसुरम् इत्यत्र सत्यपि तादर्थ्ये न भवति॥

## क्ते च। (४५/३७७९)

क्तान्ते चोत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवति। गोहितम्। अश्वहितम्। मनुष्यहितम्। गोरक्षितम्। अश्वरक्षितम्। वनं तापसरक्षितम्। अश्वशब्द आद्युदात्तः। मनुष्यशब्दोऽन्तस्वरितः। परिशिष्ट-[2]पूर्वपदमन्तोदात्तम्। गोभ्यो रक्षितम्[3] इति सम्प्रदाने चतुर्थी॥

## कर्मधारयेऽनिष्ठा। (४६/३७८०)

[4]कर्मधारये समासे क्तान्ते उत्तरपदेऽनिष्ठान्तं पूर्वपदं प्रकृतिस्वरं भवति। श्रेणिकृताः। ऊककृताः। पूगकृताः। निधनकृताः। श्रेणिशब्द आद्युदात्तः। ऊकपूगशब्दावन्तोदात्तौ। निधनशब्दोऽयं मध्योदात्तः। कर्मधारये इति किम्? श्रेण्या कृतं श्रेणिकृतम्। अनिष्ठा इति किम्? कृताकृतम्॥

## अहीने द्वितीया। (४७/३७८१)

अहीनवाचिनि समासे क्तान्ते उत्तरपदे द्वितीयान्तं पूर्वपदं प्रकृतिस्वरं भवति। कष्टश्रितः। त्रिशकलपतितः। ग्रामगतः। [5]कष्टशब्दोऽन्तोदात्तः। त्रीणि शकलानि अस्य त्रिशकलः, [6]बहुव्रीहिस्वरेणाद्युदात्तः। ग्रामशब्दो नित्स्वरेणाद्युदात्तः। अहीने इति किम्? कान्तारातीतः। योजनातीतः।

[७०९] द्वितीयाऽनुपसर्गे इति वक्तव्यम्। (म. भा. ३.१२६)

इह मा भूत्, सुखप्राप्तः। दुःखप्राप्तः। सुखापन्नः। दुःखापन्नः। अन्तः थाथेत्यस्यापवादोऽयम्॥

---

1. पित्रे इदं पित्रर्थम् ब. क. फ. 2. पूर्वं नास्ति ह. 3. गोरक्षितम् इत्यधिकम् क. फ. 4. क्ते इति वर्तते इत्यधिकम् ब. ग. 5. अनिष्ठान्तत्वात् इत्यधिकम् ह. 6. त्रिशकलशब्दः इत्यधिकम् ह.